## उपकादिभ्योऽन्यतरस्यामद्वन्द्वे । (६९/११५१)

उपक इत्येवमादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु[1]लुग् भवति अन्यतरस्यां द्वन्द्वे चाद्वन्द्वे च। अद्वन्द्वग्रहणं द्वन्द्वाधिकारनिवृत्त्यर्थम् (म. भा. १.४९४)। एतेषां च मध्ये त्रयो द्वन्द्वास्तिककितवादिषु पठ्यन्ते – उपकलमकाः, भ्रष्टककपिष्ठलाः, कृष्णाजिनकृष्णसुन्दराः इति। [2]तेषां [3]पूर्वेणैव नित्यमेव लुग् भवति। अद्वन्द्वे त्वनेन विकल्पः – उपकाः, औपकायनाः। लमका, लामकायनाः। भ्रष्टकाः, भ्राष्टकयः। कपिष्ठलाः, [4]कापिष्ठलयः। कृष्णाजिनाः, [5]कार्ष्णाजिनयः। कृष्णसुन्दराः, कार्ष्णसुन्दरयः इति। परिशिष्टानां च द्वन्द्वे[6]ऽद्वन्द्वे च विकल्पः इति।

[7]पण्डारक। अण्डारक। गडुक। सुपर्यक। सुपिष्ठ। मयूरकर्ण। खारीजङ्घ। शलावल। पतञ्जल। [8]कण्ठेरणि। [9]कुषीतक। काशकृत्स्न। निदाघ। कलशीकण्ठ। दामकण्ठ। कृष्णपिङ्गल। कर्णक। पर्णक। जटिलक। बधिरक। जन्तुक। अनुलोम। अर्धपिङ्गलक। प्रतिलोम। प्रतान। अनभिहित॥

## आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्। (७०/११५२)

[10]आगस्त्यकौण्डिन्ययोर्गोत्रप्रत्यययोः अणो यञश्च बहुषु लुग् भवति, परिशिष्टस्य च प्रकृतिभागस्य यथासङ्ख्यम् अगस्ति, कुण्डिनच् इत्येतावादेशौ भवतः। अगस्तयः। कुण्डिनाः। चकारः स्वरार्थः। मध्योदात्तो हि कुण्डिनीशब्दस्तदादेशोऽपि तथा स्यात्। अगस्त्यशब्दाद् ऋष्यण्, (४.१.११४/१११७), [11]कुण्डिनीशब्दाद् [12]गर्गादित्वाद् यञ् (४.१.१०५/११०७)। तयोः 'गोत्रेऽलुगचि' (४.१.८९/१०८१) इति लुकि [13]प्रतिषिद्धे [14]आगस्तीयाः छात्राः इति वृद्धलक्षणश्छो (४.२.११४/१३३७) भवति। कौण्डिन्ये त्वणैव भवितव्यम्, 'कण्वादिभ्यो गोत्रे' (४.२.१११/१३३२) इति। तत्र विशेषो नास्ति। [15]कौण्डिनाश्छात्राः॥

## सुपो धातुप्रातिपदिकयोः। (७१/६५०)

सुपो विभक्तेर्धातुसञ्ज्ञायाः प्रातिपदिकसञ्ज्ञायाश्च लुग् भवति। [16]तदन्तर्गतास्तद्ग्रहणेन गृह्यन्ते (प.९०)। धातोस्तावत् – पुत्रीयति। [17]घटीयति (३.१.३२/२३०४)। प्रातिपदिकस्य – [18]कष्टश्रितः। राजपुरुषः (१.२.४६/१७९)। धातुप्रातिपदिकयोः इति [19]किम्? वृक्षः। प्लक्षः (१.२.४५/१७८)॥

## अदिप्रभृतिभ्यः शपः। (७२/२४२३)

[20]अदिप्रभृतिभ्य उत्तरस्य शपो लुग् भवति। अत्ति। [21]हन्ति। द्वेष्टि॥

---

1. वर्तमानस्य इत्यधिकम् क. ड, बहुषु नास्ति फ. 2. एतेषां इ. 3. पूर्वेण ह. 4. कापिष्ठलयनाः ह. 5. कृष्णाजिनयः ग. 6. च इत्यधिकम् ड. 7. चाण्डारक इ. 8. कण्ठेरिति ब. 9. कुषीतकिः ब. 10. आगस्त्यकौण्डिन्य इत्येतयोः गोत्रप्रत्यययोरणश्च क. ड. इ. फ. ह. 11. कुण्डिन्° ड. 12. गोत्रादिभ्यो यञ् इ. ह. 13. प्रतिषेधे इ. 14. अगस्त्यायाः ब, अगस्तीयाः इ. 15. कौण्डिन्याः ह. 16. तदन्तर्गतस्तदेकदेशः इ. 17. पटीयति अ. इ. फ. ह, नास्ति क, कटीयति ड. 18. नास्ति क. 19. किमर्थम् इ. 20. अदादिभ्यो धातुभ्यः ग, अत्तिप्रभृतिभ्यः फ, अद भक्षणे इत्येवमादिभ्यः ह. 21. नास्ति ब. इ. ह.